श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ॐ॥ अर्चितःसंस्मृतोध्यातःकी
र्तितःकथितःश्रुतः॥योददात्यमृतत्वंहिसमांरक्षतुकेशवः ॥१॥ तापत्रयेणसंतप्तंयदेतदखिलंजगत् ॥ वक्ष्या
मिशांतयेतस्यकृष्णामृतमहार्णवं ॥२॥ तेनराःपशवोलोकेकिंतेषांजीवनेफलं ॥ यैर्नलब्धाहरेर्दीक्षानार्चि
तोवाजनार्दनः ॥ ३ ॥ संसारेस्मिन्महाघोरेजन्मरोगभयाकुले ॥ अयमेकोमहाभागःपूज्यतेयदधोक्षजः
॥४॥ सनामसुकृतीलोकेकुलंतेनाभ्यलंकृतं ॥ आधारःसर्वभूतानांयेनविष्णुःप्रसादितः ॥५॥ यज्ञानांतप
सांचैवशुभानांचैवकर्मणां ॥ तद्विशिष्टफलंनृणांसदैवाराधनंहरेः ॥६॥ कलौकलिमलध्वंसिसर्वपापहरंहरिं ॥
येर्चयंतिनरानित्यंतेपिवंद्यायथाहरिः ॥७॥ नास्तिश्रेयस्तमंनृणांविष्णोराराधनान्मुने ॥ युगेस्मिंस्तामसे
लोकेसततंपूज्यतेनृभिः ॥८॥ अर्चितेसर्वदेवेशेशंखचक्रगदाधरे ॥ अर्चिताःसर्वदेवाःस्युर्यतःसर्वगतोहरिः
॥९॥ स्वर्चितेसर्वलोकेशेसुरासुरनमस्कृते ॥ केशवेकंसकेशिघ्नेनयातिनरकंनरः ॥ १० ॥ सकृदभ्यर्च्यगो
विंदंबिल्वपत्रेणमानवः ॥ मुक्तिभागीनिरातंकीविष्णुलोकेचिरंवसेत् ॥ ११॥ शंकरः ॥ सकृदभ्यर्चितोये
नदेवदेवोजनार्दनः ॥ यत्कृतंतत्कृतंतेनसंप्राप्तंपरमंपदं॥१२॥सकृदभ्यर्चितोयेनहेलयापिनमस्कृतः ॥ सया

तिपरमंस्थानंयत्सुरैरपिदुर्लभं ॥१३॥ नारदः ॥ समस्तलोकनाथस्यदेवदेवस्यशार्ङ्गिणः ॥ साक्षाद्भगवतो विष्णोःपूजनंजन्मनःफलं ॥ १४ ॥ पुलस्त्यः ॥ भक्त्यादूर्वांकुरैःपुंभिःपूजितःपुरुषोत्तमः ॥ हरिर्ददातिहि फलंसर्वयज्ञैश्चदुर्लभं ॥१५॥ विधिनादेवदेवेशःशंखचक्रधरोहरिः ॥ फलंददातिसुलभंसलिलेनापिपूजितः ॥१६॥ नरकेपच्यमानस्तुयमेनपरिभाषितः ॥ किंत्वयानार्चितोदेवःकेशवःक्लेशनाशनः ॥ १७ ॥ धर्मः ॥ द्रव्याणामप्यभावेतुसलिलेनापिपूजितः ॥ योददातिस्वकंस्थानंसत्वयाकिंनपूजितः ॥ १८ ॥ नारसिंहोह षीकेशःपुंडरीकनिभेक्षणः ॥ स्मरणान्मुक्तिदोनृणांसत्वयाकिंनपूजितः ॥१९॥ ब्रह्मा ॥ गर्भस्थितामृता वापिमुषितास्तेसुदूषिताः ॥ नप्राप्तायैर्हरेर्दीक्षासर्वदुःखविमोचनी ॥ २० ॥ मार्कंडेयः ॥ सकृदभ्यर्चितोये नदेवदेवोजनार्दनः ॥ यत्कृत्यंतत्कृतंतेनसंप्राप्तंपरमंपदं ॥२१॥ धर्मार्थकाममोक्षाणांनान्योपायस्तुविद्यते ॥ सत्यंब्रवीमिदेवेशहृषीकेशार्चनादृते ॥२२॥ तस्ययज्ञवराहस्यविष्णोरमिततेजसः ॥ प्रणामंयेप्रकुर्वंतितेषा मपिनमोनमः ॥२३॥ मरीचिः ॥ अनाराधितगोविंदैर्नरैःस्थानंनृपात्मज ॥ नहिसंप्राप्यतेश्रेष्ठंतस्मादारा धयाच्युतं ॥२४॥ अत्रिः ॥ परःपराणांपुरुषस्तुष्टोयस्यजनार्दनः ॥ सचाप्नोत्यक्षयंस्थानमेतत्सत्यंमयोदि

तं ॥२५॥ अंगिराः ॥ यस्यांतःसर्वमेवेदमच्युतस्याव्ययात्मनः ॥ तमाराधयगोविंदंस्थानमग्र्यंयदीच्छसि ॥२६॥ पुलस्त्यः ॥ परंब्रह्मपरंधामयोसौब्रह्मसनातनं ॥ तमाराध्यहरिंयांतिमुक्तिमप्यतिदुर्लभां ॥२७॥ पुलहः ॥ ऐंद्रमिंद्रःपरंस्थानंयमाराध्यजगत्पतिं ॥ प्रापयज्ञपतिंविष्णुंतमाराधयसुव्रत ॥२८॥ प्राप्नोत्याराधिते विष्णौमनसायद्यदिच्छति ॥ त्रैलोक्यांतर्गतंस्थानंकिमुलोकोत्तरोत्तरं ॥२९॥ येस्मरंतिसदाविष्णुंशंखचक्रगदाधरं ॥ सर्वपापविनिर्मुक्ताःपरंब्रह्मविशंतिते ॥३०॥ ततोनिरुद्धंदेवेशंप्रद्युम्नंचततःपरं ॥ ततःसंकर्षणंदेवंवासुदेवंपरात्परं ॥३१॥ वासुदेवात्परंनास्तिइतिवेदांतनिश्चयः ॥ वासुदेवंप्रविष्टानांपुनरावर्तनंकुतः ॥ ॥३२॥ आत्रेयः ॥ योयानिच्छेन्नरःकामान्नारीवावरवर्णिनी ॥ तान्समाप्नोतिविपुलान्समाराध्यजनार्दनं ॥३३॥ ब्रह्मा ॥ बाहुभ्यांसागरंतर्तुंकइच्छतिपुमान्भुवि ॥ वासुदेवमनाराध्यकोमोक्षंगंतुमिच्छति ॥३३॥ कौशिकः ॥ अनाराधितगोविंदायेनरादुःखभागिनः ॥ आराध्यवासुदेवंस्युर्नित्यानंदैकभागिनः ॥३४॥ शंकरः ॥ कृतेपापेऽनुतापोवैयस्यपुंसःप्रजायते ॥ प्रायाश्चित्तंतुतस्योक्तंहरिसंस्मरणंपरं ॥ ३५॥ (नाम्नोस्तियावतीशक्तिःपापनिर्हरणेहरेः ॥ तावत्कर्तुंनशक्नोतिपातकंपातकीजनः) ॥३६॥ ब्रह्मा ॥ नह्यपुण्यव

तांलोकेमूढानांकुटिलात्मना ॥ भक्तिर्भवतिगोविंदेस्मरणंकीर्तनंतथा ॥३७॥ तदैवपुरुषोमुक्तोजन्मदुःख जरादिभिः ॥ जितेंद्रियोविशुद्धात्मायदैवस्मरतेहरिं ॥३८॥ प्राप्तेकलियुगेघोरेधर्मज्ञानविवर्जिते ॥ नक श्चित्स्मरतेदेवंकृष्णंकलिमलापहं ॥३९॥ नकलौदेवदेवस्यजन्मदुःखापहारिणः ॥ करोतिमर्त्योमूढात्मास्मर णंकीर्तनंहरेः ॥ ४० ॥ येस्मरंतिसदाविष्णुंविशुद्धेनांतरात्मना ॥ तेप्रयांतिभयंत्यक्त्वाविष्णुलोकमनामयं ॥४१॥ गर्भजन्मजरारोगदुःखसंसारबंधनैः ॥ नबाध्यतेनरोनित्यंवासुदेवमनुस्मरन् ॥ ४२ ॥ यममार्गम हाघोरंनरकाणियमंतथा ॥ स्वप्नेपिनैवपश्येतयःस्मरेद्गरुडध्वजं ॥४३॥ हृदिरूपंमुखेनामनैवेद्यमुदरेहरेः ॥ पादोदकंचनिर्माल्यंमस्तकेयस्यसोच्युतः ॥४४॥ गोविंदस्मरणंपुंसांपापराशिमहाचलं ॥ असंशयंदहत्या शुतूलराशिमिवानलः ॥४५॥ अगस्त्यः ॥ स्मरणादेवकृष्णस्यपापसंघातपंजरः ॥ शतधाभेदमायातिगि रिर्वज्रहतोयथा ॥४६॥ कृष्णेरताःकृष्णमनुस्मरंतितद्भावितास्तद्गतमानसाश्च ॥ भिन्नेपिदेहेप्रविशंतिकृष्णं हविर्यथामंत्रहुतंहुताशे ॥४७॥ साहानिस्तन्महच्छिद्रंसाचांधजडमूकता ॥यन्मुहूर्तंक्षणंवापिवासुदेवोनचिं त्यते ॥४८॥ नारायणोनामनरोनराणांप्रसिद्धचोरःकथितःपृथिव्यां ॥ अनेकजन्मार्जितपापसंचयंहरत्य

शेषंस्मृतमात्रएव ॥४९॥ यस्यसंस्मरणादेववासुदेवस्यचक्रिणः ॥ कोटिजन्मार्जितंपापंतत्क्षणादेवनश्यति ॥५०॥ किंतस्यबहुभिस्तीर्थैःकिंतपोभिःकिमध्वरैः ॥ योनित्यंध्यायतेदेवंनारायणमनन्यधीः ॥५१॥ येमानवाविगतरागपरावरज्ञानारायणंसुरगुरुंसततंस्मरंति ॥ ध्यानेनतेनहतकिल्बिषचेतनास्तेमातुःपयोधररसंनपुनःपिबंति॥५२॥हेचित्तचिंतयस्वेहवासुदेवमहर्निशं॥नूनंयश्चिंतितःपुंसांहंतिसंसारबंधनं ॥५३॥ आलोड्यसर्वशास्त्राणिविचार्यचपुनःपुनः॥ इदमेकंसुनिष्पन्नंध्येयोनारायणःसदा ॥५४॥ स्मृतेसकलकल्याणभाजनंयत्रजायते ॥ पुरुषस्तमजंनित्यंव्रजामिशरणंहरिं ॥ ५५॥ वेदेषुयज्ञेषुतपस्सुचैवदानेषुतीर्थेषुव्रतेषुयच ॥ इष्टेषुपूर्तेषुचयत्प्रदिष्टंपुण्यंस्मृतेतत्खलुवासुदेवे ॥५६॥ आराध्यैवनरोविष्णुंमनसायद्यदिच्छति ॥ फलंप्राप्नोतिविपुलंभूरिस्वल्पमथापिवा ॥५७॥ यन्नामकीर्तनंभक्त्याविलापनमनुत्तमं ॥ मैत्रेयाशेषपापानांधातूनामिवपावकः ॥५८॥ कलिकल्मषमत्युग्रंनरकार्तिप्रदंनृणां ॥ प्रयातिविलयंसद्यःसकृत्संकीर्तितेच्युते ॥५९॥ अनायासेनचायांतिमुक्तिंकेशवसंश्रिताः ॥ तद्विघातायजायंतेशक्राद्याःपरिपंथिनः ॥६०॥ चतुःसागरमासाद्यजंबूद्वीपोत्तमेक्वचित् ॥ नपुमान्केशवादन्यःसर्वपापचिकित्सकः ॥६१॥ यदभ्यर्च्यहरिंभक्त्या

कृतेवर्षशतैरपि ॥ फलंप्राप्नोतिविपुलंकलौसंकीर्त्यकेशवं ॥६२॥ क्षीयतेतुयदाधर्मःप्राप्तेघोरेकलौयुगे ॥ त
दानकीर्तयेत्कश्चिन्मुक्तिदंदेवमच्युतं ॥६३॥ अवशेनापियन्नाम्निकीर्तितेसर्वपातकैः ॥ पुमान्विमुच्यतेस
द्यःसिंहत्रस्तैर्मृगैरिव ॥६४॥ नारायणेतिमंत्रोस्तिवागस्तिवशवर्तिनी ॥ तथापिनरकेघोरेपतंतीत्येतदद्भुतं
॥ ६५ ॥ आर्ताविषण्णाशिथिलाश्चभीताघोरेषुचव्याधिषुवर्तमानाः ॥ संकीर्त्यनारायणशब्दमात्रंविमुक्त
दुःखाःसुखिनोभवंति ॥६६॥ कौशिकः ॥ सकृदुच्चरितंयैस्तुकृष्णेतिनविशंतिते ॥ गर्भागारगृहंमातुर्यम
लोकंचदुःसहं ॥६७॥ क्वनाकपृष्ठगमनंपुनरावृत्तिलक्षणं ॥ क्वजपोवासुदेवेतिमुक्तिबीजमनुत्तमं ॥ ६८ ॥
बुद्ध्याबुद्ध्याभ्यसेदेतद्धरिरित्यक्षरद्वयं ॥ स्मरणात्कीर्तनाद्यस्यनपुनर्जायतेभुवि ॥६९॥ हेजिह्वेममनिःस्नेहे
हरिंकिंनानुभाषसे ॥ हरिंवदस्वकल्याणिसंसारोदधिनौर्हरिः ॥ ७० ॥ असारेखलुसंसारेसारात्सारतरोह
रिः ॥ पुण्यहीनानविंदंतिसारंगाश्चयथाजलं ॥७१॥ कुरुक्षेत्रेणकिंतस्यकिंकाश्यापुष्करेणकिं ॥ जिह्वाग्रे
वर्ततेयस्यहरिरित्यक्षरद्वयं ॥७२॥ ब्रह्मा ॥ असारेखलुसंसारेसारमेकंनिरूपितं ॥ समस्तलोकनाथस्यसा
रमाराधनंहरेः ॥ ७३ ॥ साजिह्वायाहरिंस्तौतितच्चित्तंयत्तदर्पणं ॥ तावेवकेवलौश्लाघ्यौयौतत्पूजाकरौ

करौ ॥ ७४ ॥ यस्तुविष्णुपरोनित्यंदृढभक्तिर्जितेंद्रियः ॥ स्वगृहेपिवसन्यातितद्विष्णोःपरमंपदं ॥ ७५॥ शंकरः ॥ साधुसाधुमहाभागसाधुदानवनाशन ॥ यन्मांपृच्छसिधर्मज्ञकेशवाराधनंप्रति ॥७६॥ निमिषंनिमिषार्धंवामुहूर्तमपिभार्गव ॥ नादग्धाशेषपापानांभक्तिर्भवतिकेशवे ॥ ७७॥ किंतेनमनसाकार्यंयन्नतिष्ठतिकेशवे ॥ मनोमुक्तिफलावाप्तौकारणंसुप्रयोजितं ॥७८॥ रोगोनामनसाजिह्वाययानस्तूयतेहरिः ॥ गर्तौनामनतौकर्णौयाभ्यांतत्कर्मनश्रुतं ॥७९॥ नूनंतत्कंठशालूकमथवाप्युपजिह्विका ॥ रोगोनामनसाजिह्वायानवक्तिहरेर्गुणान् ॥८०॥ भारभूतैःकरैःकार्यंकिंतस्यनृपशोर्द्विज ॥ यैर्हिनक्रियतेविष्णोर्गृहसंमार्जनादिकं ॥८१॥ चरणौतौतुसफलौकेशवालयगामिनौ ॥ तेचनेत्रेमहाभागयाभ्यांसंदृश्यतेहरिः ॥८२॥ किंतस्यचरणैःकार्यंवृथासंचरणैर्द्विज ॥ यैर्हिनव्रजतेजंतुःकेशवालयदर्शने ॥८३॥ वेदवेदांगविदुषांमुनीनांभावितात्मनां ॥ ऋषित्वमपिधर्मज्ञविज्ञेयंतत्प्रसादजं ॥८४॥ विचित्ररत्नपर्यंकेमहाभोगेचभोगिनः ॥ रमंतेनाकिरामाभिःकेशवस्मरणात्फलं ॥८५॥ अश्वमेधसहस्राणांयःसहस्रंसमाचरेत् ॥ नासौतत्फलमाप्नोतितद्भक्तैर्यदवाप्यते ॥८६॥ रेरेमनुष्याःपुरुषोत्तमस्यकरौनकस्मान्मुकुलीकुरुध्वं ॥ क्रियाजुषांकोभवतांप्रया

सःफलंहियत्तत्पदमच्युतस्य ॥ ८७ ॥ विष्णोर्विमानंयःकुर्यात्सकृद्भक्त्याप्रदक्षिणं ॥ अश्वमेधसहस्रस्यफलं प्राप्नोतिमानवः ॥८८॥ प्रदक्षिणंतुयःकुर्याद्धरिंभक्तिसमन्वितः ॥ हंसयुक्तविमानेनविष्णोर्लोकंसगच्छति ॥८९॥ तीर्थकोटिसहस्राणिव्रतकोटिशतानिच ॥ नारायणप्रणामस्यकलांनार्हंतिषोडशीं ॥९०॥ उरसा शिरसादृष्ट्यामनसावचसातथा ॥ पद्भ्यांकराभ्यांजानुभ्यांप्रणामोष्टांगईरितः ॥९१॥ शाठ्येनापिनमस्का रंकुर्वतःशार्ङ्गपाणये ॥ शतजन्मार्जितंपापंनश्यत्येवनसंशयः ॥ ९२ ॥ संसारार्णवमग्नानांनराणांपापकर्म णां ॥ नान्योद्धर्ताजगन्नाथंमुक्त्वानारायणंप्रभुं ॥९३॥ रेणुकुंठितगात्रस्यकणायावंतिभारत ॥ तावद्व र्षसहस्राणिविष्णुलोकेमहीयते ॥९४॥ पावनंविष्णुनैवेद्यंसुभोज्यमृषिभिःस्मृतं ॥ अन्यदेवस्यनैवेद्यंभुक्त्वा चांद्रायणंचरेत् ॥९५॥ कोट्यैंदवसहस्रैस्तुमासोपोषणकोटिभिः ॥ तत्फलंलभतेपुंभिर्विष्णोर्नैवेद्यभक्षणात् ॥९६॥ विष्णोर्नैवेद्यशेषेणयोभुनक्तिदिनेदिने ॥ सिक्थेसिक्थेलभेत्पुण्यंचांद्रायणशताधिकं ॥९७॥ नैवेद्य शेषंतुलसीविमिश्रितंविशेषतःपादजलेनसिक्तं ॥ योश्नातिनित्यंपुरतोमुरारेःप्राप्नोतियज्ञायुतकोटिपुण्यं ॥९८॥ त्रिरात्रफलदानद्योयाःकाश्चिदसमुद्रगाः ॥ समुद्रगास्तुपक्षस्यमासस्यसरितांपतिः ॥९९॥ षण्मास

फलदागोदावत्सरस्यतुजाह्नवी ॥ विष्णुपादोदकस्यैताःकलांनार्हंतिषोडशीं ॥१००॥ गंगाप्रयागगयपुष्क
रनैमिषाणिसंसेवितानिबहुशःकुरुजांगलानि ॥ कालेनतीर्थसलिलानिपुनंतिपापंपादोदकंभगवतःप्रपुना
तिसद्यः ॥१०१॥ यानिकानिचतीर्थानिब्रह्मांडांतर्गतानिच ॥ विष्णुपादोदकस्यैताःकलांनार्हंतिषोडशीं
॥१०२॥ स्नात्वापादोदकंविष्णोःपिबन्शिरसिधारयेत् ॥ सर्वपापविनिर्मुक्तोवैष्णवींसिद्धिमाप्नुयात्॥१०३॥
यथापादोदकंपुण्यंनिर्माल्यंचानुलेपनं ॥ नैवेद्यंधूपशेषश्चआरार्तिश्चतथाहरेः ॥१०४॥ तुलस्यास्तुरजोजुष्टं
नैवेद्यस्यचभक्षणं ॥ निर्माल्यंशिरसाधार्यंमहापातकनाशनं ॥ १०५ ॥ भक्त्यावायदिवाभक्त्याचक्रांकित
शिलांप्रति ॥ दर्शनंस्पर्शनंवापिसर्वपापप्रणाशनं ॥१०६॥ शालग्रामशिलायत्रतत्रसन्निहितोहरिः ॥ तत्र
स्नानंचदानंचवाराणस्याःशताधिकं ॥१०७॥ म्लेच्छदेशेशुचौवापिचक्रांकोयत्रतिष्ठति ॥ योजनानितथा
त्रीणिममक्षेत्रंवसुंधरे॥१०८॥शालग्रामोद्भवोदेवःशैलंचक्रांकमंडलं ॥ यत्रापिनीयतेतत्रवाराणस्याःशताधि
कं ॥१०९॥ शालग्रामोद्भवोदेवोदेवोद्वारवतीभवः ॥ उभयोःसंगमोयत्रमुक्तिस्तत्रनसंशयः ॥११०॥ हरि
णामुक्तिदानीहिमुक्तिस्थानानिसर्वशः ॥ सयस्यसर्वभावेषुतस्यतैःकिंप्रयोजनं ॥ १११ ॥ हरिर्यातिहरिर्या

तिदस्युव्याजेनयोवदेत् ॥ सोपिसद्गतिमाप्नोतिगतिंसुकृतिनोयथा ॥११२॥ वासुदेवंपरित्यज्ययोन्यंदेवमुपासते ॥ त्यक्त्वामृतंसमूढात्माभुंक्तेहालाहलंविषं ॥११३॥ त्यक्त्वामृतंयथाकश्चिदन्यपानंपिबेन्नरः ॥ तथाहरिंपरित्यज्ययोन्यंदैवमुपासते ॥११४॥ स्वधर्मंतुपरित्यज्यपरधर्मंचरेद्यथा ॥ तथाहरिंपरित्यज्ययोन्यंदैवमुपासते ॥ ११५ ॥ यथागंगोदकंत्यक्त्वापिबेत्कूपोदकंनरः ॥ तथाहरिंपरित्यज्ययोन्यंदैवमुपासते ॥११६॥ गांचत्यक्त्वासमूढात्मागर्दभींवंदतेयथा ॥ तथाहरिंपरित्यज्ययोन्यंदैवमुपासते ॥११७॥ स्वमातरंपरित्यज्यश्वपाकींवंदतेयथा ॥ तथाहरिंपरित्यज्ययोन्यंदैवमुपासते ॥११८॥ वासुदेवंपरित्यज्ययोन्यंदैवमुपासते ॥ तृषितोजाह्नवीतीरेकूपंखनतिदुर्मतिः ॥११९॥ यावत्स्वस्थमिदंपिंडंनिरुजंकरणान्वितं ॥ तावत्कुरुष्वात्महितंपश्चात्तापेनतप्यसे ॥१२०॥ यावत्स्वास्थ्यंशरीरेषुकरणेषुचपाटवं ॥ तावदर्चयगोविंदमायुष्यंसार्थकंकुरु ॥१२१॥ स्मर्यतांतुहृषीकेशोहृषीकेषुदृढेषुच ॥ अदृढेषुहृषीकेषुहृषीकेशंस्मरंतिके ॥ १२२ ॥ यावच्चिंतयतेजंतुर्विषयान्विषसन्निभान् ॥ तावच्चेत्स्मरतेविष्णुंकोनमुच्येतबंधनात् ॥१२३॥ यावत्प्रलपतेजंतुर्लोकवार्तादिभिःसदा ॥ तावच्चेद्वदतेविष्णुंकोनमुच्येतबंधनात् ॥१२४॥ श्रीसूतः ॥ ज्ञात्वाविप्रैस्ति

थिंसम्यक्दैवज्ञैःसमुदीरितां ॥ कर्तव्यउपवासस्तुअन्यथानरकंव्रजेत् ॥१२५॥ क्षयेवाप्यथवावृद्धौसंप्राप्तेवादि
नक्षये ॥ उपोष्याद्वादशीपुण्यापूर्वविद्धांपरित्यजेत् ॥१२६॥ पूर्वविद्धांप्रकुर्वाणोनरोधर्मान्निकृंतति ॥ संतते
स्तुविनाशायसंपदोहरणायच ॥१२७॥ कलावेधेतुविप्रेंद्रदशम्यैकादशींत्यजेत् ॥ सुरायाबिंदुनास्पृष्टंगंगां
भइवसंत्यजेत् ॥१२८॥ श्वदृतौपंचगव्यंचदशम्यादूषितांत्यजेत् ॥ एकादशींद्विजश्रेष्ठपक्षयोरुभयोरपि
॥ १२९ ॥ तस्माद्विप्रनविद्धाहिकर्तव्यैकादशीक्वचित् ॥ विद्धाहंतिपुरापुण्यंश्राद्धंचवृषलीपतिः ॥ १३० ॥
जप्तंदत्तंहुतंस्नातंतथापूजाकृताहरेः ॥ तत्सर्वंविलयंयातितमःसूर्योदयेयथा ॥१३१॥ एकादश्यांयदाब्रह्मन्
दिनक्षयतिथिर्भवेत् ॥ उपोष्याद्वादशीतत्रत्रयोदश्यांतुपारणं ॥१३२॥ प्रतिपत्प्रभृतयःसर्वाउदयादुदयाद्र
वेः ॥ संपूर्णाइतिविज्ञेयाहरिवासरवर्जिताः ॥१३३॥ अरुणोदयकालेतुदशमीयदिदृश्यते ॥ पापमूलंतदा
ज्ञेयमेकादश्युपवासनं ॥१३४॥ अरुणोदयवेलायांदशमीयदिदृश्यते ॥ नतत्रैकादशीकार्याधर्मकामार्थना
शिनी॥१३५॥चतस्रोघटिकाःप्रातररुणोदयउच्यते ॥ यतीनांस्नानकालोयंगंगांभःसदृशःस्मृतः॥१३६॥उद
यात्प्राग्यदाविप्रामुहूर्तद्वयसंयुता ॥ संपूर्णैकादशीनामतत्रैवोपवसेद्गृही ॥१३७॥ उदयात्प्राक्त्रिघटिका

व्यापिन्येकादशीयदा ॥ संदिग्धैकादशीनामवर्ज्याधर्मार्थनाशनी ॥१३८॥ पुत्रपौत्रप्रवृद्ध्यर्थंद्वादश्यामुपवासयेत् ॥ तत्रक्रतुशतंपुण्यंत्रयोदश्यांतुपारणं ॥१३९॥ उदयात्प्राक्द्विघटिकाव्यापिन्येकादशीयदा ॥ संकीर्णैकादशीनामवर्ज्याधर्मार्थकांक्षिभिः ॥१४०॥ पुत्रराज्यप्रवृद्ध्यर्थंद्वादश्यामुपवासनं ॥ तत्रक्रतुशतं पुण्यंत्रयोदश्यांतुपारणं ॥१४१॥ दशमीशेषसंयुक्तागांधार्यासमुपोषिता ॥ तस्याःपुत्रशतंनष्टंतस्मात्तांपरिवर्जयेत् ॥१४२॥ अपीषद्दशमीविद्धासदातांपरिवर्जयेत् ॥ सुराबिंदुसमायुक्तांप्रवदंतिमनीषिणः ॥ १४३ ॥ बह्वागमविरोधेषुब्राह्मणेषुविवादिषु ॥ उपोष्याद्वादशीतत्रत्रयोदश्यांतुपारणं ॥१४४॥ एकादश्यांतुविद्धायांसंप्राप्तेश्रवणेतथा ॥ उपोष्याद्वादशीपुण्यापक्षयोरुभयोरपि ॥१४५॥ उपरागसहस्राणिव्यतीपातायुतानिच ॥ अमालक्ष्मंतुद्वादश्याःकलांनार्हंतिषोडशीं ॥ १४६ ॥ शुद्धापिद्वादशीग्राह्यापरतोद्वादशीयदि ॥ विषंतुदशमीज्ञेयामृतंचैकादशीतिथिः ॥१४७॥ विषप्रधानावर्ज्यासामृताग्राह्याप्रयत्नतः ॥ द्वादश्यांभोजनंचैवविद्धायांहर्युपोषणं ॥१४८॥ यःकुर्यान्मंदबुद्धित्वान्निरयंसोधिगच्छति ॥ यानिकानिचवाक्यानिविद्धोपोषपराणिच ॥१४९॥ धनदार्चापराणिस्युर्वैष्णवीनदशायुता ॥ अथवामोहनार्थायमोहिन्याभगवा

न्हरिः ॥१५०॥ अर्थितःकारयामासव्यासरूपीजनार्दनः ॥ धनदार्चाविवृद्ध्यर्थंमहावित्तलयस्यच ॥ असुराणांमोहनार्थंपाषंडानांविवृद्धये ॥१५१॥ आत्मस्वरूपाविज्ञस्यैस्वलोकाप्राप्तयेतथा ॥ एवंविद्धांपरित्यज्य द्वादश्यामुपवासयेत् ॥१५२॥ कोटिजन्मार्जितंपापमेकयैवविनश्यति ॥ ततःकोटिगुणंचापिनिषिद्धस्येत रैर्जनैः ॥१५३॥ यदनादिकृतंपापंयदूर्ध्वंयत्करिष्यति ॥ तत्सर्वंविलयंयातिपरेषामुपवासनात् ॥ १५४ ॥ नचतस्मात्प्रियतमःकेशवस्यममापिच ॥ एकादश्यांह्यवेधेतुद्वादशींनपरित्यजेत् ॥१५५॥ पारणेमरणेचैव तिथिस्तात्कालिकीस्मृता ॥ ब्रह्मचारीगृहस्थोवावानप्रस्थोयतिस्तथा ॥१५६॥ ब्राह्मणःक्षत्रियोवैश्यःशूद्रो भर्तृमतीतथा ॥ अभर्तृकातथान्येचसूतवैदेहिकादयः ॥ १५७ ॥ एकादश्यांनभुंजीतपक्षयोरुभयोरपि ॥ एकादश्यांतुयोभुंक्तेमोहेनावृतचेतसा ॥१५८॥ शुक्लायामथकृष्णायांनिरयंयातिसध्रुवं ॥ विवेचयतियोमो हाच्छुक्लाकृष्णेतिपापकृत् ॥१५९॥ एकादशींसवैयातिनिरयंनात्रसंशयः ॥ यथागौर्नैवहंतव्याशुक्लाकृष्णे तिभामिनि ॥१६०॥ एकादश्यांनभुंजीतपक्षयोरुभयोरपि ॥ यानिकानिचवाक्यानिकृष्णैकादशिवर्जने ॥१६१॥ भरण्यादिनिषेधेचतानिकाम्यफलार्थिनां ॥ कामिनोपिहिसिद्ध्यर्थंकुर्युरेवोपवासनं ॥१६२॥ प्रीण

नार्थंहरेर्नित्यंनतुकाम्यव्यपेक्षया ॥ तस्माच्छुक्लामथोकृष्णांभरण्यादियुतामपि ॥१६३॥ प्रत्यवायनिषेधा
र्थामुपवासीतनित्यशः ॥ प्रीणनार्थंहरेश्चापिविष्णुलोकस्यचाप्तये ॥१६४॥ कलावार्धकलावापिपरतोद्वाद
शीयदि ॥ द्वादशद्वादशीर्हंतिपूर्वेद्युःपारणेकृते ॥१६५॥ अतिरिक्ताद्वादशीचेद्यस्तांनोपोषयेद्यदि ॥ द्वा
दशद्वादशीर्हंतिद्वादशीचातिलंघिता ॥१६६॥ द्वादश्यामतिरिक्तायांयोभुंक्तेपूर्ववासरे ॥ द्वादशद्वादशीर्हं
तिद्वादशींनपरित्यजेत् ॥१६७॥ द्वादशींश्रवणोपेतांयोनोपोष्यात्सुमंदधीः ॥ पंचसंवत्सरकृतंपुण्यंतस्य
विनश्यति ॥ १६८ ॥ एकादशीमुपोष्याथद्वादशीमप्युपोषयेत् ॥ नतत्रविधिलोपःस्यादुभयोर्देवताहरिः
॥१६९॥ अल्पायामपिविप्रेंद्रपारणंतुकथंभवेत् ॥ पारयित्वोदकेनापिभुंजानोनैवदुष्यति ॥ अशितानशि
तायस्मादापोविद्धद्भिरीरिताः ॥१७०॥ अंभसाकेवलेनैवकरिष्येव्रतपारणं ॥ तद्विशिष्टंमुनिप्रोक्तमशिता
नशितंचयत्॥१७१॥नकाशीनगयागंगानरेवानचपुष्करं ॥ नचापिकौरवंक्षेत्रंतुल्यंभूपहरेर्दिनात् ॥१७२॥
अश्वमेधसहस्राणिवाजपेयशतानिच ॥ एकादश्युपवासस्यकलांनार्हंतिषोडशीं ॥१७३॥ एकादशीसमुत्थे
नवह्निनापातकेंधनं ॥ भस्मीभवतिराजेंद्रअपिजन्मशतोद्भवं ॥१७४॥ नेदृशंपावनंकिंचिन्नराणांभुविवि

द्यते ॥ यादृशंपद्मनाभस्यदिनंपातकहानिदं ॥१७५॥ तावत्पापानिदेहेस्मिंस्तिष्ठंतिमनुजाधिप ॥ याव
न्नोपोषयेज्जंतुःपद्मनाभदिनंशुभं ॥१७६॥ एकादशेंद्रियैःपापंयत्कृतंभवतिप्रभो ॥ एकादश्युपवासेनतत्सर्वं
विलयंव्रजेत् ॥१७७॥ एकादशीसमंकिंचित्पवित्रंनहिविद्यते ॥ व्याजेनापिकृताराजन्नदर्शयतिभास्करिं
॥१७८॥ श्रीव्यासः॥अन्नंनिवेदयेन्मह्यंप्राप्तेमद्वासरेशुभे ॥ तस्यापिनरकप्राप्तिःकिंपुनर्भोजनेकृते ॥१७९॥
सब्रह्महासगोघ्नश्चसस्तेनोगुरुतल्पगः ॥ एकादश्यांतुभुंजानःपक्षयोरुभयोरपि ॥ १८० ॥ वरंस्वमातृगमनं
वरंगोमांसभक्षणं ॥ वरंहत्यासुरापानमेकादश्यन्नभक्षणात् ॥१८१॥ एकादशीदिनेपुण्येभुंजतेयेनराधमाः॥
अवलोक्यमुखंतेषामादित्यमवलोकयेत् ॥१८२॥ पृथिव्यांयानिपापानिब्रह्महत्यादिकानिच ॥ अन्नमाश्रि
त्यतिष्ठंतिसंप्राप्तेहरिवासरे ॥१८३॥ रुग्मांगदः ॥ अष्टवर्षाधिकोयस्तुह्यशीतिर्नहिपूर्यते ॥ योभुंक्तेमानवः
पापोविष्णोरहनिचागते ॥१८४॥ पितावायदिवापुत्रोभार्यावापिसुहृज्जनः ॥ पद्मनाभदिनेभुंक्तेनिग्राह्यो
दस्युवद्भवेत् ॥१८५॥ ब्रह्मा ॥ उपोष्यद्वादशींपुण्यांसर्वपापक्षयप्रदां ॥ नपश्यंतियमंवापिनरकाणिनया
तनां ॥१८६॥ शंकरः॥रटंतीहपुराणानिभूयोभूयोवरानने॥नभोक्तव्यंनभोक्तव्यंसंप्राप्तेहरिवासरे ॥१८७॥

द्वादशीनप्रमोक्तव्यायावदायुःप्रवर्तते ॥ अर्चनीयोहृषीकेशोविशुद्धेनांतरात्मना ॥१८८॥ भक्त्याग्राह्योहृषीकेशोनधनैर्धरणीसुराः ॥ भक्त्यासंपूजितोविष्णुःफलंधत्तेसमीहितं ॥१८९॥ जलेनापिजगन्नाथःपूजितःक्लेशनाशनः॥ परितोषंप्रयात्याशुतृषार्तस्तुयथाजलैः ॥१९०॥ आसीनस्यशयानस्यतिष्ठतोव्रजतोपिवा ॥ रमस्वपुंडरीकाक्षनृसिंहहृदयेमम ॥१९१॥ करावलंबनंदेहिश्रीकृष्णकमलेक्षण ॥ भवपंकार्णवेघोरेमज्जतोममसर्वदा ॥१९२॥ सर्वगश्चैवसर्वात्मासर्वावस्थासुचाच्युत ॥ रमस्वपुंडरीकाक्षनृसिंहहृदयेमम ॥१९३॥ (एकादश्यांनभुंजीतनसुरांवापिबेत्क्वचित् ॥ ब्राह्मणोनैवहंतव्यइत्येषावैदिकीस्मृतिः) ॥१९४॥ त्राहित्राहिजगन्नाथवासुदेवाच्युताव्यय ॥ मांसमुद्धरगोविंददुःखसंसारसागरात् ॥१९५॥ एतत्पुण्यमिदंगुह्यंपवित्रंपापनाशनं ॥ आयुष्यंचयशस्यंचधन्यंदुःस्वप्ननाशनं ॥१९६॥ कलौपापंकियन्मात्रंहत्यास्तेयादिसंभवं ॥ स्मृतेमनसिगोविंदेदह्यतेतूलराशिवत् ॥१९७॥ कलौकेशवभक्तानांनभयंविद्यतेक्वचित् ॥ स्मृतेसंकीर्तितेध्यातेसंक्षयंयातिपातकं ॥१९८॥ अध्येतव्यमिदंशास्त्रंश्रोतव्यमनसूयया ॥ भक्तेभ्यश्चप्रदातव्यंधार्मिकेभ्यः पुनःपुनः॥१९९॥ अधीयानाइदंशास्त्रंविष्णोर्माहात्म्यमुत्तमं ॥ सर्वपापविनिर्मुक्ताःप्राप्नुवंतिपरंपदं ॥२००॥

श्रुत्वाधर्मंविजानातिश्रुत्वात्यजतिदुर्मतिं ॥ श्रुत्वाज्ञानमवाप्नोतिश्रुत्वामोक्षंचगच्छति ॥२०१॥ तस्मादिदं सदासेव्यंश्रोतव्यंचसदैवहि ॥ कुतर्कदावदग्धेभ्योनदातव्यंकथंचन ॥२०२॥ संसारविषपानेनयेमृताःप्राणिनोभुवि ॥ अमृतायस्मृतस्तेषांकृष्णामृतमहार्णवः ॥२०३॥ छिन्नंपादोदकेनैवयस्यनित्यंकलेवरं ॥ तीर्थकोटिसहस्रैस्तुस्नातोभवतिप्रत्यहं ॥२०४॥ तीर्थकोटिसहस्रैस्तुसेवितैःकिंप्रयोजनं ॥ तोयंयदिपिबेन्नित्यं शालग्रामशिलाच्युतं ॥२०५॥ शालग्रामशिलास्पर्शंयेकुर्वंतिदिनेदिने ॥ वांछंतिकरसंस्पर्शंतेषांदेवाःसवासवाः॥२०६॥ दुःसहोनारकोवह्निर्दुःसहायमकिंकराः॥ विषमश्चांतकपथःप्रेतत्वंचातिदारुणं ॥२०७॥ संचिंत्यमनसाप्येवंपातकाद्विनिवर्तयेत् ॥ स्मरणंकीर्तनंविष्णोःसदैवनपरित्यजेत् ॥२०८॥ अच्युतानंतगोविंदनामोच्चारणभेषजात् ॥ नश्यंतिसकलारोगाःसत्यंसत्यंवदाम्यहं ॥२०९॥ सकृदुच्चरितंयेनहरिरित्यक्षरद्वयं॥ बद्धःपरिकरस्तेनमोक्षायगमनंप्रति ॥२१०॥ एवंब्रह्मादयोदेवाऋषयश्चतपोधनाः ॥ कीर्तयंतिपरंश्रेष्ठंदेवंनारायणंप्रभुं ॥२११॥ किंतस्यदानैःकिंतीर्थैःकिंतपोभिःकिमध्वरैः ॥ योनित्यंध्यायतेदेवंनारायणमनन्यधीः ॥२१२॥ नित्योत्सवोभवेत्तेषांनित्यश्रीर्नित्यमंगलं ॥ येषांहृदिस्थोभगवान्मंगलायतनंहरिः॥२१३॥ जीवंश्च

तुर्दशादूर्ध्वंपुरुषोनियमेनतु ॥२१४॥ दशावराणांदेहानांकारणानिकरोत्ययं ॥ स्त्रीवाप्यनूनदशकंदेहंमानु
षमार्जयेत् ॥२१५॥ चतुर्दशोर्ध्वजीवीनिसंसारश्चादिवर्जितः ॥ अतोवित्त्वापरंदेवंमोक्षाशाकामहामुने
॥२१६॥ आचतुर्दशमाद्वर्षात्पुरुषोनियमेनतु ॥ दशावराणांदेहानांकारणानिकरोत्ययं ॥२१७॥ अतःक
र्मक्षयान्मुक्तिःकुतएवभविष्यति ॥ समानांविषमापूजाविषमाणांसमातथा ॥२१८॥ क्रियतेयेनदेवोपिस्व
पदाद्भ्रश्यतेहिसः॥ वित्तंबंधुर्वयःकर्मविद्याचैवतुपंचमी ॥ एतानिमान्यस्थानानिगरीयोह्युत्तरोत्तरं ॥२१९॥
गुणानुसारिणींपूजांसमांदृष्टिंचयोनरः ॥ सर्वभूतेषुकुरुतेतस्यविष्णुःप्रसीदति ॥२२०॥ यथासुहृत्सुकर्तव्यं
पितृभ्रातृसुतेषुच ॥ तथाकरोतिपूजांहिसमबुद्धिःसउच्यते ॥ २२१ ॥ तिर्यक्पुंड्रंनकुर्वीतसंप्राप्तेमरणेपिवा
॥२२२॥ नचान्यनामविब्रूयात्परान्नारायणादृते ॥ नैवेद्यशेषंदेवस्ययोभुनक्तिदिनेदिने ॥२२३॥ सिक्थेसि
क्थेभवेत्पुण्यंचांद्रायणशताधिकं ॥ ऊर्ध्वपुंड्रमृजुंसौम्यंललाटेयस्यदृश्यते ॥२२४॥ सचंडालोपिशुद्धात्मा
पूज्यएवनसंशयः ॥२२५॥ अशुचिर्वाप्यनाचारोमनसापापमाचरन् ॥२२६॥ शुचिरेवभवेन्नित्यमूर्ध्वपुंड्रां
कितोनरः ॥ ऊर्ध्वपुंड्रविहीनस्यस्मशानसदृशंमुखं ॥२२७॥ अवलोक्यमुखंतस्यआदित्यमवलोकयेत् ॥

यज्ञोदानंतपश्चैवस्वाध्यायःपितृतर्पणं ॥२२८॥ व्यर्थंभवतितत्सर्वमूर्ध्वपुंड्रंविनाकृतं ॥ गोपीचंदनलिप्तांगो यंयंपश्यतिचक्षुषा ॥२२९॥ तंतंशुद्धंविजानीयान्नात्रकार्याविचारणा ॥ आस्फोटयंतिपितरःप्रनृत्यंतिपि तामहाः॥२३०॥वैष्णवोस्मत्कुलेजातःसनःसंतारयिष्यति ॥ जीवितंविष्णुभक्तस्यवरंपंचदिनान्यपि ॥२३१॥ नतुकल्पसहस्रैस्तुभक्तिहीनस्यकेशवे ॥ किंतेनजातमात्रेणभूभारेणान्नशत्रुणा ॥२३२॥ योजातोनार्चयेद्वि ष्णुंनस्मरेन्नापिकीर्तयेत् ॥ योददातिद्विजातिभ्यश्चंदनंगोपिमर्दितं ॥२३३॥ अपिसर्षपमात्रेणपुनात्यासप्त मंकुलं ॥ ज्ञानीचकर्माणिसदोदितानिकुर्यादकामःसततंभवेत ॥२३४॥ अतीतानागताज्ञानीत्रैलोक्युद्धर णक्षमः ॥ एतादृशोपिनाचारंश्रौतंस्मार्तंपरित्यजेत् ॥२३५॥ यदेवविद्ययाकरोतिश्रद्धयोपनिषदातदेववी र्यवत्तरंभवति ॥ कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाः ॥२३६॥ एवंत्वयिनान्यथेतोस्तिनकर्मलिप्यतेनरे॥ आचारश्चैवसाधूनामात्मनस्तुष्टिरेवच ॥२३७॥ वेदप्रणिहितोधर्मोह्यधर्मस्तद्विपर्ययः ॥ निष्कामंज्ञानपूर्वंतु निवृत्तमिहचोच्यते ॥२३८॥ निवृत्तंसेवमानस्तुब्रह्माभ्येतिसनातनं ॥२३९॥ श्रीमदानंदतीर्थार्यसहस्रकि रणोत्थिता ॥ गोततिःसततंसेव्यागीर्वाणैःसिद्धिदाभवेत् ॥ २४० ॥ यस्यत्रीण्युदितानिवेदवचनेरूपाणि

दिव्यान्यलंबद्दतद्दर्शतमित्थमेवनिहितंदेवस्यभर्गोमहत् ॥ वायोरामवचोनयंप्रथमकंपृक्षोद्वितीयंवपुर्मध्वो यत्तुतृतीयमेतदमुनाग्रंथःकृतःकेशवे ॥ २४१ ॥ यःसर्वगुणसंपूर्णःसर्वदोषविवर्जितः ॥ प्रीयतांप्रीतएवालं विष्णुर्मेपरमःसुहृत् ॥२४२॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितःकृष्णामृतमहार्णवःसंपूर्णः ॥

॥ कृष्णामृतमहार्णवःसंपूर्णः ॥

The Credit of getting the Sarvamoola Books Scanned goes to Panditavareenya ityaadi birudankita Shreemajjaalihaala Shreenivaasaachaaryasya Vidyaa Suta, "Gomanjari" Udgrantha kartru, (Raghunatha suri virachita Manikya manjari granthasya Khandana Grantha) Veda Shaastra Puraanaartha Vishaarada, Panditavareenya Shree Dwarakaanaathaachaaryaru. My heartful salute for him to provide me such a wonderful opportunity to work on this project.

Project Started on : 21 December 2009
Project Completed on : 20 March 2011

Scanned By : Aravindacharya Haranahalli, aravindbharadwajhs@gmail.com